# Aksharadidevakrita Shri Hari Stuti

# અક્ષરાદિદેવકૃતા શ્રીહરિસ્તુતિઃ

## Document Information

Text title : Aksharadidevakrita Shri Hari Stuti

File name : akSharAdidevakRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# અક્ષરાદિદેવકૃતા શ્રીહરિસ્તુતિઃ

સત્યપ્રતિજ્ઞમવિકારિણમાદિદેવં
ગૂઢાશયં ભયહરં વિમલં પરાત્મન્ ।
સચ્ચિત્સુખં ત્વભયદં પરતઃ પરઞ્ચ
ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૧॥

જન્માદિ ચાસ્ય જગતો ભવતો યતો વૈ
વેદૈઃ સદાઽપરિમિતાદિગુણૈર્વિગીતમ્ ।
ધ્યાતં સદા મુનિવરૈશ્ચ સમાધિનિષ્ઠૈ-
સ્ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૨॥

સત્યવ્રતં પરમસત્યમચિન્ત્યમાદ્યં
સત્યસ્ય યોનિમથ સત્યપરાક્રમઞ્ચ ।
સત્યાત્મકં ત્રિયુગસત્યપદં પુરાણં
ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૩॥

પ્રાકટ્યમેતદિહ નાથ વસુન્ધરાયાં
નૈવાસ્તિ કર્મવશતસ્તવ સર્વયન્તુઃ ।
કિન્તુ સ્વભક્તહિતશર્મસુમઙ્ગલાર્થં
ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૪॥

સર્વર્દ્ધિસદ્ગુણનિધે કરુણૈકસિન્ધો
નૈકાણ્ડનાથ પરિશાસક ઈશ્વરેશ ।
ભક્તપ્રિયં સુખકરં તવ દાસદાસા
સ્ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૫॥

વૃદ્ધિં ગતં બહુતરાં ભુવિ ચાપ્યધર્મં
દૃષ્ટ્વા વિભોઽનુયુગમત્ર કૃપાનિધે ત્વમ્ ।
નાશાય તસ્ય નુ બિભર્ષિ કિલાવતારાઁ-
સ્ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૬॥

સાક્ષાદ્ વિલોક્ય પરમં પુરુષોત્તમં ત્વાં
જાતા વયં હિ ભગવન્નિતરાં કૃતાર્થાઃ ।
ધન્યાશ્ચ મોદમધિગા ભૃશમેવ સર્વે
ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૭॥

ત્વાં સ્તોતુમન્તપરિહીનમગમ્યરૂપં
શક્તા વયં ન પુરુદિવ્યવિભૂતિધામન્ ।
યસ્માત્તવાઙ્ઘ્રિકમલે ધૃતમાનસા હિ
ત્વાં ધર્મદેવતનયં વયમાનમામઃ ॥ ૮॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
ષષ્ઠે તરઙ્ગે-અક્ષરાદિદેવકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

---

*Aksharadidevakrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*